"गायत्रीं त्रिः सकृद्वापि जपेद्व्याहृतिपूर्विकाम् । मधु-वाता इति ऋचं मध्वित्येतत् त्रिकं जपेत्" इति पारस्करः । ७आज्यमधुसितात्रये न० "कमलैश्च त्रिमध्वक्तैर्हुनेदष्टोत्तरं शतम्" तन्त्र० ।

**त्रिमधुर** न० त्रिगुणितं मधुरं संज्ञात्वात् कर्म० । दुग्धसितामाक्षिकरूपे मधुरत्रये त्रिमधुशब्दे दृश्यम् । त्रिमधुरेणाध्यर्च्चयेन्नागान्" हृ० ४८ अ० ।

**त्रिमातृ** त्रि० त्रयाणां लोकानां माता निर्माता । लोकत्रयनिर्मातरि"उत त्रिमाता विदथेषु सम्राट्"ऋ०३।५६।५ऋ०।

**त्रिमात्र** पु० तिस्रः मात्रा उच्चारणकालेऽस्य । प्लुतस्वरे "एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्"शिक्षा०"प्रणवस्य ऋषिर्ब्रह्मा देवोऽग्निस्तस्य कथ्यते । गायत्रञ्च भवेच्छन्दो नियोगः सर्वकर्मसु । त्रिमात्रस्तु प्रयोक्तव्यः प्रारम्भे सर्वकर्मणाम्" संवर्त्तः । भोजदेवेन तु तस्य सार्द्धत्रिमात्रकतोक्ता यथा "तज्जपस्तदर्थभावनम्" पा० सू० "तस्य सार्द्धत्रिमात्रिकस्य प्रणवस्य जपः" वृत्तिः । युक्तञ्चैतत् ओकारस्य प्लुतत्वेन त्रिमात्रत्वेऽपि तदुत्तरमकारस्य व्यञ्जनत्वादर्द्धमात्रत्वेन सार्द्धत्रिमात्रत्वं संवर्तवचने त्रिमात्रपदं सार्द्धत्रिमात्रे लाक्षणिकमिति बोध्यम्। वस्तुतः मकारान्तत्वे सार्द्धत्रिमात्रत्वम् अनुस्वारान्तत्वे त्रिमात्रत्वमिति भेदः । तदभिप्रायेणैव तस्य त्रिमात्रतया जपफलं प्रश्नोपनिषद्युक्तं तच्च ओम् शब्दे १५६० पृ० दर्शितम् ।

**त्रिमार्गगा** स्त्री त्रिभिर्मार्गैर्गच्छति गम—ड । १गङ्गायां हेमच० । "त्रिमार्गगावीचिविमर्दशीतः" रघुः । "अन्वर्थसंज्ञैव परं त्रिमार्गगा"माघः । गम—णिनि । त्रिमार्गगामिन्यादयोऽप्यत्र ।

**त्रिमार्गी** स्त्री त्रयो मार्गा अस्याः । १गङ्गायां "त्रिमार्गयेव त्रिदिवस्य मार्गः" कुमा० । (तेमाता) २पथि । "त्रयाणां मार्गाणां समाहारः । ३मार्गत्रये स्त्री ङीप् । [हेमच०।

**त्रिमुकुट** पु०त्रीणि मुकुटानीव शृङ्गाणि यस्य । त्रिकूटपर्वते

**त्रिमुख** पु० त्रीणि मुखानि अस्य । १शाक्यमुनौ त्रिका० । गायत्रीजपाङ्गे चतुर्विंशतिमुद्रान्तर्गते मुद्राभेदे तल्लक्षणं विधानपारिजाते उक्तं यथा "संमुखासक्तयोः पाण्योः कनिष्ठाद्वययोगतः । शेषाङ्गुलीनां वैरल्यात् मुद्राः स्युर्द्विमुखादयः" "संमुखासक्तपाण्योः कनिष्ठाद्वययोगेन शेषाङ्गुलीनां विरलत्वेनाङ्गुष्ठद्वयमारभ्यानामिकान्तं यावत् द्विमुखत्रिमुखचतुर्मुखपञ्चमुखाः मुद्राः स्युः' तद्व्याख्या । तथा चाङ्गुष्ठतर्ज्जनीनां वैरल्ये त्रिमुखमुद्रा ।२बुद्धदेवीभेदे मायादेव्यां स्त्री त्रिका० ।

**त्रिमुनि** न० त्रयाणां मुनीनां समाहारः । पाणिनिकात्यायनपतञ्जलिरूपे मुनित्रये । त्रयो मुनयो वंश्याः "संख्या वंश्येन" पा० स० । पाणिन्यादिमुनित्रयप्रणीते व्याकरणे विद्यातद्वतामभेदविवक्षया तस्य तथात्वम् "वंशश्च जन्मना विद्यया वा तत्र भवः वंश्यः" इति सि०कौ० ।

**त्रिमूर्त्ति** पु० तिस्रो मूर्तयोऽस्य । ब्रह्मविष्णुशिवरूपमूर्तित्रययुक्ते परमेश्वरे । "नमस्त्रिमूर्त्तये तुभ्यं प्राक्सृष्टेः केवलात्मने" कुमा० । त्रिमूर्तिर्यः सर्गस्थितिविलयकर्माणि तनुते" चिन्तामणिः २ब्रह्मशक्तिभेदे स्त्री । "एकमूर्तिरपि भिन्नरूपिणी या जगज्जननपालनक्षये । कात्यु-तेश्वरतया विवर्तते ब्रह्मशक्तिमहमानतोऽस्मि ताम्" शब्दार्थचि० धृ० वाक्यम् । ३बुद्धदेवीभेदे स्त्री त्रिका०।

**त्रिमूर्द्ध** पु० त्रयो मूर्द्धानोऽस्य ष समा० । मूर्द्धत्रययुक्ते । "बहुमूर्द्धा द्विमूर्द्धांश्च त्रिमूर्द्धांश्चाहृतां क्षणे"भट्टिः ।

**त्रियम्बक** पु० त्रीण्यम्बकानि दृष्टयो यस्य । "छन्दस्युभयथा" पा० वा इयङ् । त्रिनेत्रे । क्वचिल्लोकेऽपि इयङ् "त्रियम्बकं संयमिनं ददर्श" कुमा० तद्व्याख्यायां मल्लिनाथेन महाकविप्रयोग एव तत्र मूलत्वोक्तः ।

**त्रियव** न० त्रयो यवाः परिमाणमस्य । कृष्णले"सर्षपाः षट्यवो मध्यस्त्रियवं त्वेककृष्णलम्" मनुः ।

**त्रियष्टि** स्त्री त्रिषु वातादिषु यष्टिरिव विद्रावकत्वात् । (क्षेतपापड़ा) १क्षुपभेदे रत्नमा० । तिस्रो यष्टयो यस्य । २त्रिगुच्छे हारभेदे पु० । [ वुल् । पामे शब्दमा० ।

**त्रियामक** न० त्रिषु कालेषु यमयति अन्तर्भूतण्यर्थे यम—

**त्रियामा** स्त्री त्रयो यामा अस्याः आद्यान्त्ययोरर्द्धयामयोश्चेष्टाकालत्वेन दिनप्रायत्वात् । १निशायाम् अमरः "त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम् । नाड़ीनां, तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" ति० त० । "संक्षिप्येत क्षणमिव कथं दीर्घयामा त्रियामा"मेघ० ।"क्वचिदसमेतपरिच्छदस्त्रियामाम्" रघुः । "ज्योतिर्भिरुद्यद्भिरिव त्रियामा"कुमा० २हरिद्रायाम् अमरः । कृष्णत्वात् ३यमुनायां ४नील्यां ५कृष्णत्रिवृति च उणादिको० ।

**त्रियुग** पु० त्रीणि युगानि आविर्भावकालोऽस्य । १यज्ञपुरुषे तस्य कृतयुगे आविर्भावाभावात् कलौ छन्नत्वात् वा । "इत्थं नृतिर्य्यगृषिदेवझषावतारैर्लोकान् विभावयसि